# PT-2/HALF YEARLY EXAMINATION, 2022-23
## SANSKRIT

**Time - 7:15 AM to 10:20 AM** **Class - IX** **M.M. : 80**

**Date – 07.09.2022 (Wednesday)**

**Name of the student** ______________________________ **Section** _____

**निर्देशाः -**
- प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
  - खण्डः (क) अपठित-अवबोधनम् - 10 **अङ्काः**
  - खण्डः (ख) रचनात्मक - कार्यम् - 15 **अङ्काः**
  - खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 25 **अङ्काः**
  - खण्डः (घ) पठित- अवबोधनम् - 30 **अङ्काः**
- सर्वे प्रश्नाः अनिवार्याः सन्ति ।
- प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।
- उत्तराणि संस्कृतेनैव लेखनीयानि ।
- प्रश्नसंख्या अवश्यमेव लेखनीया ।

## खण्डः - क (अपठितावबोधनम् - 10 अंकाः)

**प्र.1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

विज्ञानस्य नवीनेषु आविष्कारेषु एकः अतीव उपयोगी आविष्कारः अस्ति - चलभाषियन्त्रम् (मोबाइल इति) । अस्य मुखं प्रयोजनमासीत् दूरवर्तिना केनापि जनेन सह वार्तालापः सुकरः भवेत् इति । परमद्यत्वे तु चलभाषियन्त्रं लघुसंगणकमिव वर्तते । एवं प्रतीयते यत् जनाः हस्ते एकं सम्पूर्णं जगत् एव नयन्तः गच्छन्ति। अनेन ते न केवलं वार्तां कुर्वन्ति अपितु वार्तया सहैव वक्तारं साक्षात् पश्यन्त्यपि । ईमेल-फेसबुक व्हाट्सएप-माध्यमैः एतदतीव सुकरं संदेशवाहकमपि ।

अस्य माध्यमेन गमनागमनार्थं शीघ्रमेव वाहनं प्राप्य जनाः सरलतया स्वगन्तव्यं प्राप्नुवन्ति । केवलमेतदेव न अपितु एतत् यन्त्रं मनोरंजनकारि अपि, बालाः वृद्धाः युवानः अस्य माध्यमेन विविध क्रीडाभिः मनोरञ्जनक्षमाः भवन्ति । परमेतदपि विचारणीयं यदस्य अधिकाधिकप्रयोगः हानिकरः भवति । अति सर्वत्र वर्जयेत् । इत्यनुरूपेण अस्य यथावश्यकं प्रयोगः एव करणीयः ।

**अ) एकपदेन उत्तरत -** **(1×2=2)**

क) किम् अतीव सुकरं सन्देशवाहकम् ?

ख) जनाः वार्तया सह साक्षात् कं पश्यन्ति ?

**ब) पूर्णवाक्येन उत्तरत -** **(2×2=4)**

क) अस्य मुख्यं प्रयोजनं किमासीत् ?

ख) अस्य प्रयोगेण के कथं च मनोरंजनक्षमाः भवन्ति ?

**स) यथा निर्देशम् उत्तरत -** **(1×3=3)**

क) 'लब्ध्वा' इत्यर्थे किं पदं गद्यांशेऽस्मिन् प्रयुक्तम् ?

अ) प्राप्य ब) वार्तया स) नयन्तः द) करणीयः

ग) 'चलभाषियन्त्रं लघुसंगणकमिव वर्तते' इत्यत्र किम् क्रियापदम् ?

अ) लघुसंगणक ब) वर्तते स) संगणकमिव द) भवेत्

ख) 'जनेन सह वार्तालापः सुकरः भवेत्' इत्यत्र किं विशेषणपदम् ।

अ) जनेन ब) वार्तालापः स) सुकरः द) भवेत्

**द) उपरोक्तगद्यांशस्य उचितं शीर्षकं दीयताम् ।** **(1)**

## खण्डः - ख (रचनात्मककार्यम् - 15 अंकाः)

**प्र.2** **भवान् अविनाशः । शैक्षिकभ्रमणाय अनुमतिं व्ययार्थं धनं प्रार्थयितुं च पितरं प्रति मंजूषायाः सहायतया पत्रं लिखतु ।** **(½×10=5)**

**मञ्जूषा -**

| |
|---|
| गन्तुम्, अनुमतिः, शैक्षिक भ्रमणस्य, प्रथमसत्रीया, भवान्, स्वाध्याये, प्रतीक्षायाम्, शीघ्रातिशीघ्रं, प्रेषयन्तु, सहस्त्ररुप्यकाणि |

छात्रावासः

दिनांक ..........

पूज्यपितृचरणाः

प्रणतीनां शतम् !

अत्र अहं कुशलः (i) ......... व्यावृतः अस्मि । आशासे (ii) ......... अपि मात्रा सह आनन्देन निवसति । मम (iii) ......... परीक्षा सम्पन्ना । परीक्षानन्तरं शिक्षकैः सह छात्राणां (iv) ......... योजना अस्ति । यदि भवतः (v) ......... स्यात् तर्हि अहमपि तैः सह (vi) ......... इच्छामि । सर्वैः एव गन्तुकामैः (vii) ......... देयानि सन्ति । भवतः अनुमतिः अस्ति चेत् पञ्चशतरुप्यकाणि शुल्काय, पञ्चशतरुप्यकाणि च मार्गव्ययार्थं (viii) ......... भवन्तः ।

कृपया (ix) ......... स्वमन्तव्यं प्रकटयन पत्रं लिखतु ।

भवतः अनुमत्याः (x) ......... भवतः पुत्रः ।

अविनाशः

**प्र.3** **मञ्जूषायाः शब्दानाम् सहायतया चित्रस्य वर्णनम् पञ्चवाक्येषु कुरुत -** **(1×5=5)**



**मंजूषा -**

| |
|---|
| **उपवनस्य, बालकाः, बालिकाः, पुरुषः, पुष्पाणि पश्यन्ति, वृक्षाः, उपनेत्रम्, धारितः, शिक्षकः, एतत् चित्रम्** |

**प्र.4** **अधोलिखितेषु वाक्यानां संस्कृत भाषायाम् अनुवादं कुरु -** **(1×5=5)**

क) हम सब संस्कृत पढ़ते हैं ?

ख) वे सब क्या करते हैं ?

ग) वह बालक विद्यालय जाता है ।

घ) नदी के दोनों ओर वृक्ष हैं ।

ङ.) तुम सब कलम से लिखते हो ।

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 25 अंकाः)

**प्र.5** **अधोलिखितवाक्येषु रेखांकितपदानां सन्धिम् अथवा सन्धिविच्छेदं कृत्वा लिखत -** **(1×4=4)**

क) **सूर्यातपे** तण्डुलान् खगेभ्यो रक्ष ।

ख) **नैतादृशः** स्वर्णपक्षो रजतचञ्चुः पूर्वं दृष्टः ।

ग) सः पितरमेकान्ते **नि + अवेदयत्** ।

घ) **छाया + इव** मैत्री खलसज्जनानाम्।

**प्र.6** **अधोलिखितवाक्येषु उचित विभक्तियुक्तपदैः रिक्तस्थानानि पूरयत -** **(1×4=4)**

क) अहम् ........... निम्बवृक्षम् आरोपयामि । (उद्यान)

ख) वयम् ........... गृहं गच्छामः । (लता)

ग) हे ........... ! त्वम् धन्यः असि । (हरि)

घ) सर्वत्र ........... प्रकाशः अस्ति ।

अ) भानुस्य ब) भान्वोः स) भानोः द) भानूनाम

**प्र.7** **अधः प्रदत्तेषु धातुरुपेषु उचितैः धातुरुपैः रिक्त स्थानानि पूरयत -** **(1×4=4)**

क) त्वम् ध्यानेन गृहकार्यम् .................। (कृ - लोट्लकारः)

ख) रमा विद्यालयम् .................। (गम् - लृट्लकारः)

ग) सेवकाः स्वामिनम् .................। (सेव् - लट्लकारः)

घ) भोजः एकः प्रतापी राजा .................।

अ) आसन् ब) आसीत् स) आस्ताम् द) आसीः

**प्र.8** **उचित उपपद विभक्तिनाम् प्रयोगं रिक्तस्थानेषु कुरुत -** **(1×4=4)**

क) ............. समया केलो नदी अस्ति । (रायगढ़नगर)

ख) उदारजनः ............. विश्वसिति । (दान)

ग) ............. सह कः अस्ति ? (बालिका)

घ) ............. नमः ।

अ) गणेशम् ब) गणेशः स) गणेशाः द) गणेशाय

**प्र.9** **अधोलिखितेषु वाक्येषु प्रकृति प्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत ।** **(1×4=4)**

क) त्वाम् ............. वृद्धः प्रसीदति । (दृश्+ क्त्वा)

ख) कूपात् जलं <u>आनीय</u> माता आगच्छति ।

ग) छात्रः <u>पठितुम्</u> विद्यालयं गच्छति ।

घ) अहम् देशाय किं न .......... । (कृ + क्तवतु)

अ) कृतवान् ब) कृतवन्तौ स) कृतवन्तम् द) कृतवन्तः

**प्र.10** **अंकानां स्थाने संस्कृत संख्यावाचक विशेषणैः वाक्यानि पूरयित्वा लिखत -** **(1×3=3)**

क) वेदाः ......4....... सन्ति । (चत्वारः / चतस्रः / चत्वारि)

ख) ......3....... महिलाः प्रतिदिनं पूजां कुर्वन्ति । (तिस्रः / त्रयः / त्रीणि)

ग) ......2....... भगिन्यौ सस्वरं गीतां पठतः । (द्वौ / द्वे / द्वयः)

**प्र.11** **अधोलिखितेषु पदेषु उपसर्गान् पृथक् कृत्वा लिखत -** **(½×4=2)**

क) प्रभवति     ख) अनुकरोति     ग) निरगच्छत्     घ) प्रत्यवदत्

**अथवा**

**अधोलिखतवाक्येषु उचित - अव्ययपदैः रिक्तस्थानानि पूरयत -**

क) ..............अहम् गृहं गच्छामि ।

अ) विना     ब) उच्चैः     स) अत्र     द) अधुना

ख) अहं ............. दिल्लीनगरं गमिष्यामि ।

अ) ह्यः     ब) भवः     स) अद्य     द) कदा

ग) प्रणवः अद्य ..................... गच्छति ?

अ) बहिः     ब) भवः     स) ह्यः     द) कुत्र

घ) ..................... सत्यं वदेत् ।

अ) बहिः     ब) सर्वदा     स) ह्यः     द) कुत्र

## खण्डः - घ (पठितावबोधनम् - 30 अंकाः)

**प्र.12** **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

तस्मिन्नेव ग्रामे एकाऽपरा लुब्धा वृद्धा न्यवसत् । तस्या अपि एका पुत्री आसीत् । ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यमभिज्ञातवती । सूर्यातपे तण्डुलान्निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता । तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत् । प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत् - भो नीचकाक ! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ । काकोऽब्रवीत् - अहं त्वत्कृते सोपानमुत्तारयामि । तत्कथय स्वर्णमयं रजतमयं ताम्रमयं वा । गर्वितया बालिकया प्रोक्तम् - स्वर्णमयेन सोपानेनाहमागच्छामि परं स्वर्णकाकस्तत्कृते ताम्रमयं सोपानमेव प्रायच्छत् । स्वर्णकाकस्तां भोजनमपि ताम्रभाजने अकारयत् ।

अ) **एकपदेन उत्तरत -** **(½×2=1)**

क) लुब्धा वृद्धा कुत्र न्यवसत् ?

ख) सा कस्य रहस्यमभिज्ञातवती ?

ब) **पूर्णवाक्येन उत्तरत -** **(1)**

गर्वितया बालिकया किं प्रोक्तम् ?

स) **भाषिक कार्यम् -** **(1×3=3)**

क) 'गच्छामि' इत्यस्य विलोमपदं चिनुत ।

अ) अहम्     ब) आगच्छामि     स) प्रायच्छत्     द) न्यवसत्

ख) 'पात्रे' इत्यर्थे किं पदं प्रयुक्तम् ?

अ) भाजने     ब) सोपाने     स) त्वत्कृते     द) ताम्रमयम्

ख) 'स्वर्णकाकस्तां भोजनममि ताम्रभाजने अकारयत्' अत्र कर्तृपदं किम् ?

अ) स्वर्णकाकस्तां     ब) भोजनम्     स) स्वर्णकाकः     द) ताम्रभाजने

**प्र.13** **अधोलिखितम् पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।

अ) **एकपदेन उत्तरत -** **(½×2=1)**

(i) वृत्तं केन संरक्षेत् ?     (ii) कुतः क्षीणः ?

ब) **पूर्णवाक्येन उत्तरत -** **(1)**

कस्मात् हतो हतः ?

स) **निर्देशानुसारं उत्तरं लिखत -** **(1×3=3)**

(i) 'धनम्' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

(क) वृत्तं (ख) वित्तम् (ग) याति (घ) वित्ततः

(ii) 'याति' इति क्रियापदस्यं कर्तृपदं किं प्रयुक्तम् ?

(क) वृत्तं (ख) वित्तम् (ग) आयाति (घ) वित्ततः

(iii) 'रक्षा कर्तव्या' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(क) संरक्षेद् (ख) वित्तम् (ग) याति (घ) हतः

**प्र.14 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

(तः प्रविशति मोदकगन्धम् अनुभवन् प्रसन्नमना चन्दनः)

चन्दन : अहा ! सुगन्धस्तु मनोहरः (विलोक्य) अये मोदकानि रच्यन्ते ? (प्रसन्नः भूत्वा) आस्वादयामि तावत् । (मोदकं ग्रहीतुमिच्छति) मल्लिका - सक्रोधम् विरम । विरम । मा स्पृश ! एतानि मोदकानि ।

चन्दनः - किमर्थ क्रुध्यसि ! तव हस्तनिर्मितानि मोदकानि दृष्ट्वा अहं जिह्वालोलुपतां नियन्त्रयितुम् अक्षमः अस्मि । किं न जानासि त्वमिदम् ?

मल्लिका -सम्यग् जानामि नाथ ! परम् एतानि मोदकानि पूजानिमित्तानि सन्ति ।

चन्दनः - तर्हि शीघ्रमेव पूजनं सम्पादय । प्रसादं च देहि ।

अ) **एकपदेन उत्तरत -** **(½×2=1)**

(i) ततः कीदृशः चन्दनः प्रविशति ?

(ii) मल्लिका कानि अरचयत् ?

ब) **पूर्णवाक्येन उत्तरत -** **(1)**

चन्दनः कानि दृष्ट्वा स्वजिह्वालोलुपतां नियन्त्रयितुम् अक्षमः आसीत् ?

स) **भाषिक कार्यम् -** **(1×3=3)**

(i) 'हस्तनिर्मितानि मोदकानि' अनयोः पदयोः विशेषणपदं किम् ?

(क) मोदकानि (ख) हस्तनिर्मितानि (ग) निर्मितम् (घ) मोदकम्

(ii) 'किं न जानासि त्वमिदम्' अत्र वाक्ये क्रियापदं किमस्ति ?

(क) किम् (ख) इदम् (ग) जानासि (घ) त्वम्

(iii) संवादे 'दृष्ट्वा' इत्यस्य पदस्य कः पर्याय प्रयुक्तोऽस्ति ?

(क) विलोक्य (ख) अनुभवन् (ग) भूत्वा (घ) नियन्त्रयितुम्

**प्र.15 निम्नवाक्येषु रेखांकित पदानां स्थानेषु प्रश्नवाचकशब्दं लिखत -** **(1x4=4)**

क) सनीरे समीरे **मन्दं मन्दं** वहति ?

ख) **मरालैः** सह विप्रयोगः सरोवराणां हानिः भवति ।

ग) **सूर्योदयात्** पूर्वमेव बालिका तत्रोपस्थिता ।

घ) तत्रैव एका अपरा लुब्धा **वृद्धा** न्यवसत् ।

**प्र.16 अधोलिखितश्लोकयोः अन्वययोः रिक्तस्थानानि पूरयत -** **(½x8=4)**

क) आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।

दिनस्य पूर्वार्द्धपरार्द्ध भिन्ना छायेव मैत्री खलसज्जनानाम् ।।

**अन्वयः** - आरम्भगुर्वी (1)....... क्षयिणी, पुरा (2)....... पश्चात् च वृद्धिमती, (3)....... पूर्वाद्धं (4)....... च छाया इव खलसज्जनानाम् मैत्री भिन्ना (भवति) ।

ख) श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।

आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।।

**अन्वयः** - धर्मसर्वस्वं श्रूयतां (1)....... च (2)....... अवधार्यताम् (3)....... प्रतिकूलानि (4)....... न समाचरेत् ।

**मंजूषा -** | **अपरार्द्ध, परेषाम्, दिनस्य, श्रुत्वा, एव, लघ्वी, आत्मनः, क्रमेण** |

**अथवा**

**अधोलिखितं श्लोकं पठित्वा भावलेखनम् कुरुत -**

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।

गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ।।

**अस्यभावोऽस्ति** - यत् अस्मिन् संसारे जनाः सदैव (1)....... ग्रहणे एव (2)....... कुर्युः । यतः जगति गुणवन्तः (3)....... अपि गुणहीनेषु (4)....... श्रेष्ठतमाः मन्यन्ते । अतः संसारे गुणानाम् अतीव महत्त्वम् अस्ति ।

**मंजूषा -** | **प्रयत्नान्, धनवत्सु, दरिद्राः, गुणानाम्** |

**प्र.17 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत -** **(½x8=4)**

क) मल्लिकायाः गृहे उमा आगच्छति ।

ख) चन्दनः सेटक-त्रिंशतकानि दुग्धार्थं मासपर्यन्त नन्दिनीं सेवते ।

ग) मल्लिका स्वगृहे सुगन्धितानि स्वादिष्टानि च मोदकानि रचयन्ती गायति ।

घ) दुग्धदोहनसमये नन्दिनी स्व पृष्ठपादेन चन्दनं रक्तरंजितं करोति ।

ङ.) उमायाः गृहे मासानन्तरं महोत्सवः अस्ति अतः सा चन्दनं सेटक-त्रिशतकानि दुग्धार्थं वदति ।

च) सा स्वधर्मयात्रायाः विषये स्वपतिं चन्दनं सूचयति ।

छ) मल्लिका स्वसखिभिः सह गंगास्नानार्थं धर्मयात्रायां गच्छति ।

ज) मल्लिकाचन्दनौ मिलित्वा कुम्भकारं देवेशं प्रति पंचदश घटार्थं गच्छतः ।

**प्र.18 पर्यायपदानाम् उचितमेलनं कुरूत -** **(1x3=3)**

| पदानि | पर्यायपदानि |
|---|---|
| क) सरस्वती | दृष्ट्वा |
| ख) विलोक्य | दुग्धम् |
| ग) पयः | वाणी |